শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রী অঞ্জনশৈলনাথস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী অঞ্জনশৈলনাথস্তোত্রম্ ॥

পুলকিনি ভুজমধ্যে পূজযন্তং পুরন্ধ্রীং
ভুৱননযনপুণ্যং পূরিতাশেষকামম্।
পুনরপি ৱৃষশৈলে ফুল্লনীলোতপলাভং
পুরুষমনুভৱেযং পুণ্ডরীকাযতাক্ষম্॥ ১॥

আজানসৌহৃদমপারকৃপামৃতাব্ধিম
অৱ্যাজৱতসলমৱেলসুশীলমাদ্যম্।
আনন্দরাশিমনুরাগমযাৱরোধম
আরাধযামি হরিমঞ্জনশৈলনাথম্॥ ২॥

আতাম্রপাদমৱদাতসুৱর্ণচেলম
আপীনবাহুশিখরোজ্জ্বলশঙ্খচক্রম্।
আৱিসস্মিতাননমমন্দদযাকটাক্ষম
আরাধযামি হরিমঞ্জনশৈলনাথম্॥ ৩॥

অপ্রাকৃতাৱযৱসংহিতসন্নিৱেশম
আরূঢযৌৱনমহীনকুমারভাৱম্।
অম্লানকান্তিমতিৱাঞ্ছনসানুভাৱম
আরাধযামি হরিমঞ্জনশৈলনাথম্॥ ৪॥

আশাৱকাশসমুদিত্বরসর্ৱগন্ধম
আস্বাদযতসুগমসর্ৱরসস্বভাৱম্।
আশ্লেষগম্যসুখসংস্পৃশনাতিরেকম
আরাধযামি হরিমঞ্জনশৈলনাথম্॥ ৫॥

আদর্শযন্তমতিসঙ্কুচিতাক্ষিশক্তিম
আশ্রাৱযন্তমখিলান্ বধিরান্ প্রকৃত্যা।
আভাষযন্তমভিতো নতমূকৱর্গম
আরাধযামি হরিমঞ্জনশৈলনাথম্॥ ৬॥

www.prapatti.com

আধাৰযন্তমতিমাৰুতমেৰ পঙ্গূন
আজানুলম্বিভুজযন্তমহো কুবাহূন্।
অন্যাংশ্চ কৃত্তশিৰসঃ প্ৰতিজীৰযন্তম
আৰাধযামি হৰিমঞ্জনশৈলনাথম্॥ ৭ ॥

আজন্মনির্ধনজনানলকেশযন্তম
অজ্ঞানপি ত্ৰিদশদেশিকদেশ্যযন্তম্।
অহ্নায ৰন্ধ্যমপি মর্ত্যমৰন্ধ্যযন্তম
আৰাধযামি হৰিমঞ্জনশৈলনাথম্॥ ৮ ॥

আবদ্ধকঙ্কণমশেষশৰণ্যতাযাম
আপতসহাযমপৰাধসহং নতানাম্।
আসন্নসামগসুখালসসূৰিৰর্গম
আৰাধযামি হৰিমঞ্জনশৈলনাথম্॥ ৯ ॥

অধ্যাসিতাসনসৰোজসনূপুৰাঙ্ঘ্ৰিম
আমুক্তৰীৰকটকাযতৰৃত্তজঙ্ঘম্।
আশ্চর্যজানুযুগমপ্ৰতিমোৰুকাণ্ডম
আৰাধযামি হৰিমঞ্জনশৈলনাথম্॥ ১০ ॥

আৰর্তিনিম্ননিখিলাণ্ডনিদাননাভিম
আযামিদোৰ্ৰ্বিৰকেলিগৃহাৰৰোধম্।
আবদ্ধৰত্নমযভূষভুজাচতুষ্কম
আৰাধযামি হৰিমঞ্জনশৈলনাথম্॥ ১১ ॥

অংসাৰলম্বিমণিকুণ্ডলকান্তগণ্ডম
আৰিসস্মিতাংশুমধুৰাধৰবন্ধুজীৰম্।
আস্যাব্জসৌৰভসমুতসুকদীর্ঘনাসম
আৰাধযামি হৰিমঞ্জনশৈলনাথম্॥ ১২ ॥

অৰ্ধেন্দুভাস্বদলিকোল্লসদূৰ্ধ্ৰৰপুণ্ড্ৰম
আলোলনীলকুটিলালকচাৰুৰক্ত্ৰম্।
আৰিৰ্মযূখমণিচূডমহাকিৰীটম
আৰাধযামি হৰিমঞ্জনশৈলনাথম্॥ ১৩ ॥

ৰাদিভীতিকরার্যেণ রচিতা ভাৱবন্ধতঃ।
শোভতে ৱেঙ্কটাদ্রীশৱিষযা স্তুতিরদ্ভুতা॥ ১৪ ॥

॥ ইতি শ্রী অঞ্জনশৈলনাথস্তোত্রং সমাপ্তম্॥

www.prapatti.com